# संस्कृत वार्ता:

दिनाङ्क : 30/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- निर्वाचन-आयोगेन अद्य तमिळुनाडुराज्यस्य विधानसभा-निर्वाचनस्य, पश्चिमबङ्गालराज्यस्य विधानसभा-निर्वाचनस्य प्रथम-चरणस्य च सूचना प्रसारिता।
- प्रधानमन्त्री नरेन्द्रमोदी असम-राज्यस्य दलकार्यकर्तृभिः सह वार्तालापम् अकरोत्।
- वित्तमन्त्री निर्मला-सीतारमणवर्या अकथयत् यत् भारतीयमुद्रायाः मूल्यं मार्केट इत्याधारितं भवति अपि च वैश्विकानिश्चिततानाम् अनन्तरम् अपि भारतस्य सूक्ष्मार्थव्यवस्थानीतयः सुदृढतया तिष्ठन्ति ।
- लोकसभया अद्य <u>इन्सॉल्वेंसी एंड बैंकरप्सी कोड (अमेंडमेंट) बिल</u>, इत्येतत् विधेयकं वॉइस-वोट इत्यनया विधिना पारितम् अस्ति ।
- बिहारस्य मुख्यमन्त्री नितीशकुमारः, सद्यः एव राज्यसभायां निर्वाचनानन्तरं राज्यविधानपरिषदः सदस्यतायाः त्यागपत्रं प्रदत्तवान्।
- श्रीलङ्का-देशस्य राष्ट्रपतिः अनुरा कुमार दिसानायके इत्येषः पश्चिम-एशिया-सङ्कटकालस्य मध्ये देशे इन्धन-प्रेषणं समर्थनाय भारतं प्रति कृतज्ञतां प्रकटितवान्।
- भारतस्य शीतलदेवी इत्येषा विश्व-धनुष्क्रीडया ' पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य पैरा आर्चर् आफ् द इयर्' इत्यस्य कृते नामाङ्किता।

---

<u>ई-विज्ञापन-तमिलनाडुः</u>

भारतस्य निर्वाचन-आयोगेन अद्य तमिळुनाडुराज्यस्य विधानसभा-निर्वाचनस्य, पश्चिमबङ्गालराज्यस्य विधानसभा-निर्वाचनस्य च प्रथम-चरणस्य सूचना प्रसारिता। अधिसूचनायाः निर्गमनेन राज्येषु नामाङ्कनपत्राणां प्रस्तुतिः समारब्धा अस्ति। तमिलनाडु-

राज्यस्य सर्वेषु चतुःत्रिंशोत्तर-द्विशत-विधानसभासनेषु एक-चरणीय मतदानं भविष्यति, पश्चिमवङ्गस्य द्विपञ्चाशदधिकैकशतासनानां कृते च प्रथम-चरणस्य मतदानं अग्रिममासस्य त्रयोविंशति-दिनाङ्के भविष्यति। नामाङ्कनपत्रस्य प्रस्तुतीकरणस्य अन्तिमतिथिः अग्रिममासस्य षट्-दिनाङ्कः अस्ति, अग्रिमे दिने नमाङ्कन-पत्राणां परीक्षणं भविष्यति। प्रत्याशिपदस्य निराकरणस्य अन्तिमतिथिः अग्रिमे मासस्य नवम-दिनाङ्क: अस्ति।

-----------------------------------------------

## प्रधानमन्त्री-आसाम

प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी अद्य अपराह्ने मेरा बूथ्, सबसे मजबूत् इति संवाद कार्यक्रमस्य अन्तर्गतम् असम-राज्यस्य दलकार्यकर्तृभिः सह वार्तालापम् अकरोत्। दलकार्यकर्तॄन् सम्बोधयन् श्रीमोदी अवदत् यत् असम-राज्ये मनः स्थितिः स्पष्टा अस्ति, राज्यस्य जनाः एन्. डी. ए-दलाय मतदानं कर्तुं सज्जाः सन्ति।

संवादावधौ श्रीमोदी दलकार्यकर्तृभ्यः दलस्य स्पष्टविजयाय अहर्निशं कार्यं कर्तुं प्रार्थयत्। असम-राज्ये अप्रैल्-मासस्य नवमे दिनाङ्के एकस्मिन् चरणे मतदानं भविष्यति।

-----------------------------------------------

## वित्तमन्त्री-रुपये

वित्तमन्त्री निर्मला-सीतारमणवर्या अद्य संसदि भारतीयार्थव्यवस्थायाः सुदृढीकरणस्य पक्षं सबलं प्रतिपादयन्ती अकथयत् यत् भारतीयमुद्रायाः मूल्यं मार्केट इत्याधारितं भवति अपि च वैश्विकानिश्चिततानाम् अनन्तरम् अपि भारतस्य सूक्ष्मार्थव्यवस्थानीतयः सुदृढतया तिष्ठन्ति । भारतीयमुद्रायाः मूल्यापचितिविषये लोकसभायां प्रवर्तमाने प्रश्नकाले प्रत्युत्तरं प्रयच्छन्ती , वित्तमन्त्रीवर्या अकथयत् यत् भारतीयार्थव्यवस्थायाः नीतयः सुदृढाः सन्ति सहैव वैश्विकानिश्चिततायाः कारणेन आविश्वं मुद्रामूल्येषु आरोहावरोहौ दृश्यते ।

-----------------------------------------------

## लोकसभा-विधेयकम्

लोकसभया अद्य इन्सॉल्वेंसी एंड बैंकरप्सी कोड (अमेंडमेंट) बिल, इत्येतत् विधेयकं वॉइस-वोट इत्यनया विधिना पारितम् अस्ति । लोकसभायाम् इन्सॉल्वेंसी एंड बैंकरप्सी कोड (अमेंडमेंट) बिल, इत्यस्मिन् विधेयके चर्चायाः प्रत्युत्तरं प्रयच्छन्ती ,वित्तमन्त्री निर्मलासीतारमणवर्या प्रोक्तवती यत् , इन्सॉल्वेंसी एंड बैंकरप्सी कोड इति विधेयकस्य उद्देश्यं केवलं ऋणाहरणस्य कार्यं न आसीत् ,अपितु अस्योद्देश्यं तु व्यापारसंरक्षणं , वित्तस्य अनियमिततायाः दूरीकरणं , औद्योगिकमूल्यानां स्थापनं च आसीत्।

विधेयकस्य विषये सा अकथयत् यत् इन्सॉल्वेंसी एंड बैंकरप्सी कोड इत्यनेन देशस्य बैंकक्षेत्रे सुव्यवस्था सुदृढा जाता अस्ति ।

---------------------------------------------------

## बिहार-त्यागपत्रम्

बिहारस्य मुख्यमन्त्री तथा जनतादल (युनाईटेड) इत्यस्य अध्यक्षः नितीशकुमारः, सद्यः एव राज्यसभायां निर्वाचनानन्तरं, संविधानस्य नियमानाम् अनुपालनं कुर्वन्, राज्यविधानपरिषदः सदस्यतायाः त्यागपत्रं प्रदत्तवान्। जे. डी. (यू) दलस्य एम्. एल्. सी. सञ्जय् गान्धी इत्ययं नितीश-कुमारस्य त्यागपत्रम् विधानपरिषदः अध्यक्षाय अवधेश-नारायण-सिङ्घाय समर्पितवान्। पटना-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, वरिष्ठमन्त्री विजयकुमारचौधरी इत्ययम् अवदत् यत्, एतत् संवैधानिकप्रक्रियायाः भागम् आसीत् । मुख्यमन्त्रिणः त्यागपत्रस्य विषये आधिकारिकघोषणा शीघ्रमेव अपेक्षिता अस्ति। अस्मिन् मासे षोडश दिनाङ्के जे. डी. (यू) प्रमुखः संसदः उच्चसदनस्य कृते निर्विरोधः निर्वाचितः। अत्रान्तरे, भाजपा-दलस्य राष्ट्रिय-अध्यक्षः नितिननबीनः अस्य मासस्य आरम्भे राज्यसभायाः कृते निर्वाचितः भूत्वा, संविधानस्य उपबन्धानुसारम् अद्य बिहारविधानसभायाः सदस्यतायाः त्यागपत्रं प्रदत्तवान्।

---------------------------------------------------

## श्रीलङ्का-भारतम्

श्रीलङ्का-देशस्य राष्ट्रपतिः अनुरा-कुमार दिसानायके इत्येषः पश्चिम-एशिया-सङ्कटकालस्य मध्ये देशे इन्धन-प्रेषणं समर्थनाय भारतं प्रति कृतज्ञतां प्रकटितवान्। सामाजिकान्तर्जालीये संदेशे राष्ट्रपतिः दिसानायके वर्यः अवदत् यत् सः सद्यः एव प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वर्तमानस्य द्वन्द्वस्य कारणात् श्रीलङ्कादेशस्य इन्धनाभावस्य विषये वार्तालापम् अकरोत्। सः अवदत् यत्, शनिवासरे कोलम्बो-नगरे विंशतिसहस्र-मीट्रिक्-टन् परिमितं डीज़लेति ईधनं, अष्टादशसहस्र मेट्रिक्-टन् परिमितं पेट्रोल इति ईधनं इत्येतैः सह अष्टत्रिंशत् सहस्र मेट्रिक्-टन् परिमितं पेट्रोलियम इत्यस्य प्रेषणस्य अनन्तरं भारतस्य द्रुतसमर्थनस्य कृते सः कृतज्ञः अस्ति।

-----------------------------------------------

## लोकसभा

लोकसभायां वामपंथस्य उग्रवादात् देशम् मुक्तं कर्तुं प्रयत्नानां विषये चर्चा आरब्धा।वादविवादस्य आरम्भं कुर्वन् शिवसेनासदस्यः श्रीकान्तशिन्देवर्यः नरेन्द्रमोदीसर्वकारस्य, अर्धसैनिकबलानाम्,आरक्षिबलानां च देशम् नक्सल्-मुक्तं कर्तुं कृतप्रयासानां प्रशंसाम् अकरोत्। वामपंथोग्रवादेन सह युद्धं कुर्वन्तः ये सर्वे अपि प्राणत्यागं कृतवन्तः तेभ्यः सर्वेभ्यः सुरक्षाकर्मचारिभ्यः अपि सः श्रद्धाञ्जलिम् अददात्। श्रीशिन्देवर्यः काङ्ग्रेस्-दलस्य उपरि प्रहारं कृत्वा उक्तवान् यत् यदा कांग्रेसदलं सत्तायाम् आसीत्, तदा आदिवासिनां, अनुन्नतसमुदायानां च कृते आवश्यकसौकर्याणि प्रदातुं तदसफलम् अभवत्, येन ते शस्त्राणि नेतुं बाध्याः अभवन्। सः अवदत् यत्, एकः समयः आसीत् यदा आदिवासिनः शोषणं सम्मुखीकृत्य नक्सलेa अस्यामग्नौ निक्षिप्तवन्तः, परन्तु अद्य स्थितिः परिवर्तिता। सः‌अवदत् यत्, अधुना एका आदिवासि-महिला राष्ट्रपतिरूपेणदेशस्य सर्वोच्चं संवैधानिकं स्थानं धारयति। सः अवदत् यत्,मोदी-सर्वकारेण आदिवासिनां, दरिद्राणाम्, उपेक्षितानां च विश्वासः पुनः प्राप्तः अस्ति। श्री शिन्देवर्यः अवदत् यत्,सर्वकारस्य निरन्तरप्रयासेण इदानीं रेड्-कारिडार् इतीदं वृद्धि-कारिडार्-रूपेण परिवर्त्यते। सः अवदत् यत्, वामपन्थोग्रवादः, यः देशस्य द्विशतमण्डलेषु प्रसृतः आसीत्, इदानीं केवलं त्रीणि मण्डलानि यावदेव सीमीतोऽभवत् इति। चर्चायां भागम् गृह्णन् काङ्ग्रेस्-दलस्य सप्तगिरि-

शङ्कर-उलका इत्येषःअवदत् यत् यू. पी. ए-सर्वकारस्य काले अपि नक्सल्-मतस्य उन्मूलनाय अनेके प्रयत्नाः कृताः । सः अवदत् यत् आरक्षकाणाम् आधुनिकीकरणम् , अष्टोत्तरद्विसहस्रतमे वर्षे कोब्रा इति आरक्षिबलस्य स्थापना अभवत् । सः इति अपि अकथयत् यत् यू. पी. ए. सर्वकारस्य शासनकाले नक्सल-प्रभावितक्षेत्रेषु मार्गाणां, विद्यालयानां च निर्माणं कृतम् आसीत् । भाजपा-दलस्य सम्बित्-पात्रा आरोपं प्रख्यापितवान् यत् यत् यू. पी. ए-सर्वकारः नक्सल-जनानाम् रक्षणार्थंकार्यं कृतवान् ।

---------------------------------------------------

<u>राज्यसभा-नड्डा</u>

राज्यसभायाः सभापतिःतथा केन्द्रीयमन्त्री जे. पी. नड्डा तुष्टिकरणराजनीतिं कर्तुं मुस्लिम्-समुदायं वोटबैंक् इति रूपेण द्रष्टुं च इण्डी-ग्रन्थिबन्धनं काङ्ग्रेस्-दलं च प्रति विरोधं प्रकटितवान्। राज्यसभायां चर्चां कुर्वन् श्रीनड्डाःअवदत् यत्, विपक्षदलानां वादविवादे रुचिः न अस्ति, नैव लोकतान्त्रिकमूल्येषु संविधाने च तेषां मनसि सम्मानः अस्ति। अद्य शून्यकालस्य एकस्याः घटनायाः उल्लेखं कुर्वन् श्रीनड्डाः अवदत् यत्, यदा भाजपसदस्यः के. लक्ष्मणः स्वस्य निर्धारितसमये भाषणं कुर्वन् आसीत्, तदा इण्डीदलस्य सदस्याः निरन्तरं तं व्याकुलं कुर्वन्ति स्म। सः अवदत् यत्, एतत् लोकतान्त्रिक-संसदीय-प्रक्रियासु विश्वासस्य अभावं प्रतिबिम्बयति ।

---------------------------------------------------

<u>आई. पी. एल.</u>

आई. पी. एल. क्रिकेट्-क्रीडायाम् अद्य सायङ्काले गुवाहाटी-नगरस्य बरसापारा-क्रिकेट्-क्रीडाङ्गणे राजस्थान्-रायल्स्-दलं चेन्नई-सुपर्-किङ्ग्स्-दलम् सम्मुखी करिष्यति। भारतीयसमयानुसारम् सायं सार्द्ध सप्तवादने क्रीडायाः आरम्भः भविष्यति। ह्यः मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे आयोजिते स्पर्धायाः द्वितीयक्रीडायां मुम्बई-इण्डियन्स् दलेन कोलकाता-नाईट-रायडर्स् इत्येतं दलं षट् स्तोभैः पराजितम्।

---------------------------------------------------

## धनुष्क्रीडा

भारतस्य शीतलदेवी इत्येषा पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य पैरा आर्चर आफ् द इयर्' इत्यस्य कृते नामाङ्किता।

।। इति वार्ता: ।।